# सुन्दरसुरभाषा

मुनिवरविकसित–कविवरविलसित
मञ्जुलमञ्जूषा, सुन्दरसुरभाषा ।
अयि मातस्तव पोषणक्षमता
मम वचनातीता, सुन्दरसुरभाषा ॥ ॥ मुनिवर.. ॥

वेदव्यास–वाल्मीकि–मुनीनाम्
कालिदास–बाणादिकवीनाम्
पौराणिक–सामान्य–जनानाम्
जीवनस्य आशा, सुन्दरसुरभाषा ॥ ॥ मुनिवर.. ॥

श्रुतिसुखनिनदे सकलप्रमोदे
स्मृतिहितवरदे सरसविनोदे
गति–मति–प्रेरक–काव्यविशारदे
तव संस्कृतिरेषा, सुन्दरसुरभाषा ॥ ॥ मुनिवर.. ॥

नवरस–रुचिरालङ्कृति–धारा
वेदविषय–वेदान्त–विचारा
वैद्य–व्योम–शास्त्रादि–विहारा
विजयते धरायां, सुन्दरसुरभाषा ॥ ॥ मुनिवर.. ॥

श्री नारायणभट्टः